जिह्वातालुगलक्लोमशोषे मूर्द्धनि दापयेत् ।
केशरं मातुलुङ्गस्य घृतसैन्धवसंयुतम् ॥
दाडिमं बदरं लोध्रं कपित्थं बीजपूरकम् ।
पिष्ट्वा मूर्द्धनि लेपस्तु पिपासादाहनाशनः ॥
वारि शीतं मधुयुतमाकण्ठाद्वा पिपासितम् ।
पाययेद्वामयेच्चापि तेन तृष्णा प्रशाम्यति ॥
प्रातः सशर्करः पेयो हिमो धान्याकसम्भवः ।
जयेत् तृष्णां तथा दाहं भवेत् स्रोतोविशोधनम् ।
अमलं कमलं कुष्ठं लाजाश्च वटरोहकम् ।
एतच्चूर्णस्य मधुना गुटिकां धारयेन्मुखे ॥
तृष्णां प्रवृद्धां हन्त्येषा मुखशोषञ्च दारुणम् ।
क्षतोद्भवां रुग्विनिवारणेन
जयेत् क्षतानामसृजश्च पातैः ।
क्षयोत्थितां क्षीरजलं निहन्या-
न्मांसोदकं वा मधुकोदकं वा ॥
आमोद्भवां बिल्ववचायुतानां
जयेत् कषायैरथ दीपनानाम् ।
गुर्व्वन्नजामुल्लिखनैर्जयेच्च
क्षयं विना सर्व्वकृताश्च तृष्णाम्” ॥
उल्लिखनैः लेखनद्रव्यैः । स्निग्धेऽन्ने भुक्ते या तृष्णा स्यात्ताश्च गुड़ाम्बुना शमयेत् । अतिरोगदुर्ब्ब-लानां तृष्णां शमयेन्तृणामिहाशु पयः ॥ पयोऽत्र दुग्धम् ।
“मूर्च्छाच्छर्द्दितृषादाहस्त्रीमद्यभृशकर्षिताः ।
पिबेयुः शीतलं तोयं रक्तपित्ते मदात्यये ॥
सात्म्यान्नपानभैषज्यैस्तृष्णां तस्य जयेत् पुनः ।
तस्यां जितायामन्योऽपि व्याधिः शक्यश्चिकित्सितुम् ॥
तृष्यन् पूर्व्वामयक्षीणो न लभेत जलं यदि ।
मरणं दीर्घरोगं वा प्राप्नुयात् त्वरितं नरः ॥
तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति ।
तस्मात् सर्व्वास्ववस्थासु न क्वचिद्वारि वारयेत् ॥
अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम् ।
तोयाभावात् पिपासार्त्तः क्षणात् प्राणैर्विमुच्यते” ॥
इति तृष्णाधिकारः । इति भावप्रकाशः ॥
क्षतविध्वंसी, [न्] पुं, (क्षतं व्रणं स्रवद्रक्तपूयादिकं विध्वंसयतीति । वि + ध्वन्स + णिच् + णिनि ।) वृद्धदारवृक्षः । इति शब्दचन्द्रिका ॥
क्षतव्रणः, पुं, (क्षतजन्यः व्रणः क्षतजो व्रणो वा ।) षट्प्रकारव्रणरोगान्तर्गतव्रणरोगविशेषः । इति भावप्रकाशः ॥ तद्विवरणं व्रणशब्दे द्रष्टव्यम् ॥
क्षतव्रतः, त्रि, (क्षतं भग्नं व्रतमस्य ।) ध्वस्तनियमः । तत्पर्य्यायः । अवकीर्णी २ । इत्यमरः ।२।७।५४॥ तथा च याज्ञवल्क्यः ।
“अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितम् ।
गर्द्दभं पशुमालभ्य नैरृतं स विशुद्ध्यति” ॥
इति प्रायश्चित्ततत्त्वम् ॥
क्षतहरं, क्ली, (क्षतं हरतीति । हृ + टः ।) अगुरु । इति शब्दचन्द्रिका ॥
क्षतिः, स्त्री, (क्षण + क्तिन् ।) अपचयः । क्षयः । (यथा, महाभारते । ३ । १७२ । १९ ।
“हयानां न क्षतिः काचित् न रथस्य न मातलेः” ।)
“जलमुचि वितरणविमुखे

का क्षतिरस्थिरधिषणामुपालभ्याम् ।
केवलघनरसभक्षी
चातकपक्षी कमाश्रयति” ॥
इत्युद्भटः ॥
क्षतोदरः, पुं, (क्षतं शर्करादिभिन्नं उदरमत्र रोगे । अथवा क्षतात् स्रुतात् जातं उदरं उदररोग-विशेषो यत्र ।) उदररोगविशेषः । तस्य सामा-न्यरूपमाह ।
“आध्मानं गमनेऽशक्तिर्दौर्ब्बल्यं दुर्ब्बलाग्निता ।
शोथः सदनमङ्गानां सङ्गो वातपुरीषयोः ।
दाहस्तन्द्रा च सर्व्वेषु जठरेषु भवन्ति हि” ॥
सन्निकृष्टनिदानपूर्व्विकां संख्यामाह ।
“पृथग्दोषैः समस्तैश्च प्लीहबद्धक्षतोदकैः ।
सम्भवन्त्युदराण्यष्टौ तेषां लिङ्गं पृथक् शृणु” ।
क्षतोदरमाह ।
“शल्यं तथान्नोपहितं यदन्नं
भुक्तं भिनत्त्यागतमन्यथा वा ।
तस्मात् स्रुतोऽन्त्रात् सलिलप्रकाशः
स्रावः स्रवेद्वै गुदतस्तु भूयः ॥
नाभेरधश्चोदरमेति वृद्धिं
निस्तुद्यते दाल्यति चातिमात्रम् ।
एतत् परिस्राव्युदरं प्रदिष्टं
दकोदरं कीर्त्तयतो निबोध” ॥
शल्यं कण्टककर्करादि अन्नोपहितं अन्नमिश्रितं भुक्तं यत् अन्नं भिनत्ति तथा अन्यथा आगतं भोजनं विना आगतं शरादि तदपि यदन्नं भिनत्ति एतदुपलक्षणम् । जृम्भयात्यशनञ्च अन्त्र भिनत्ति । यत उक्तं चरके ।
“शर्कराद्यथाकाष्ठास्थिकण्टकैरन्नसंयुतैः ।
भिद्येतान्त्रं यदा भुक्तं जृम्भयात्यशनेन च” ॥ इति तस्मात् भिन्नादन्त्रात् । गुदतस्तु भूयः अन्त्रात् संस्रुत्य पुनर्गुदतः स्रवेदित्यर्थः । दाल्यति विदीर्य्यत इव । पदसिद्धिरार्षत्वात् । एतत् क्षतोदरं तन्त्रा-न्तरे परिस्राव्युदरं प्रदिष्टम् ॥
तस्य चिकित्सा ।
“शालिषष्टिकगोधूमयवनीवारभोजनम् ।
निरूहो रेचनं श्रेष्ठं सर्व्वेषु जठरेषु च ॥
आनूपमौदकं मांसं शाकं पिष्टकृतं तिलाः ।
व्यायामाध्वदिवास्वप्नयानपानानि वर्ज्जयेत् ॥
तथोष्णलवणाम्लानि विदाहीनि गुरूणि च ।
नाद्यादन्नानि जठरे तोयपानञ्च वर्ज्जयेत् ॥
उदराणां मलाढ्यत्वात् गाढशः शोधनं हितम् ।
क्षीरैरैरण्डजं तैलं पिबेन्मूत्रेण वा सह” ॥
इति भावप्रकाशः । (उदररोगशब्दे विशेषविवृ-तिरस्य ज्ञेया ॥)
क्षत्ता, [ऋ] पुं, (क्षद संवृतौ । सौत्रधातुरयम् ।
“तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ” ।
उणां ।२।९४ । इति संज्ञायां तृच् स चानिट् ।) सारथिः । द्वाःस्थः । इत्यमरः । ३ । ३ । ६२ ॥ दासीपुत्रः । (यथा, महाभारते । १ । विदुराग-मनपर्व्वणि । २०१ । १७ ।
“ततः प्रीतमनाः क्षत्ता धृतराष्ट्रं विशाम्पते !

उवाच दिष्ट्या कुरवो वर्द्धन्त इति विस्मितः” ॥)
नियुक्तः । ब्रह्मा । इति मेदिनी ॥ क्षत्रियायां शूद्राज्जातः । (यथा, मनुः । १० । १२ ।
“शूद्रादायोगवः क्षत्ता चाण्डालश्चाधमो नृणाम् ।
वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः” ॥)
मत्स्यः । इति संक्षिप्तसारोणादिवृत्तिः ।
क्षत्रं, क्ली, (क्षतः त्रायते इति । क्षत् + त्रै + कः ।) शरीरम् । इत्युणादिकोषः । तगरम् । इति राजनिर्घण्टः ।(क्षत्रियकुलम् । यथा, ऋग्वेदे । ५ । ६२ । ६ ।
“अक्रविहस्ता सुकृते परस्पा
यं त्रासाथे वरुणेलास्वन्तः ।
राजाना क्षत्रमहृणीयमाना
सहस्रस्थूणं बिभृथः सह द्वौ” ॥)
क्षत्रः, पुं, (क्षद + “गुधृवीपचिवचियमिसदिक्षदि-भ्यस्त्रः” । उणां ४ । १६६ । इति त्रः ।) क्षत्रियः । इत्युणादिकोषः ॥ (यद्वा, क्षतः क्षतात् त्रायते इति । त्रै + कः । यथा, रघुः । २ । ५३ ।
“क्षतात् किल त्रायत इत्युदग्रः
क्षत्रस्य शब्दो भुवनेषु रूढ़ः” ।
“नाश्वकर्णादिवत् केवलरूढ़ः किन्तु पङ्कजादिवत् योगरूढ़ः” इत्यर्थः । इति मल्लिनाथः ॥)
क्षत्रबन्धुः, पुं, (क्षत्रियस्य बन्धुरिव ।) निन्दितक्षत्रि-यः । इत्यमरटीका । (यथा, मार्कण्डेये । ८ । ७४ ।
“क्षत्रबन्धो ! ममैतां त्वं सदृशीं यद्यदक्षिणाम् ।
मन्यसे यदि तत् क्षिप्रं पश्य त्वं मे बलं परम्” ॥
क्षत्रं राज्यं देहो वा बन्धुरिवास्य ।) क्षत्रमात्रम् । (यथा, मनुः । २ । ३८ ।
“आषोड़शात् ब्राह्मणस्य सावित्री नातिवर्त्तते” ।
आद्वाविंशात् क्षत्रबन्धोराचतुर्विंशतेर्विशः ॥)
क्षत्रवृक्षः, पुं, (क्षत्रसंज्ञकः वृक्षः ।) मुचुकुन्दः । इति राजनिर्घण्टः । (पर्य्यायोऽस्य यथा,—
“मुचुकुन्दः क्षत्रवृक्षश्चित्रकः प्रतिविष्णुकः” ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणा-श्चास्य मुचुकुन्दशब्दे ज्ञातव्याः ॥)
क्षत्रियः, पुं, (क्षत्रे राष्ट्रे साधुः । क्षत्रस्यापत्यं वा ।
“क्षत्राद् घः” । ४ ।१ । १३८ । इति जातौ घः ।)
क्षदति रक्षति जनान् क्षत्रः । क्षद संवृतौ सौत्रः ततस्त्रासुसिति त्रः । क्षतात् त्रायते इति हे मनीषादित्वात् क्षतान्त्याकारलोपे वा क्षत्रः । क्षत्रो हितकारः । पुंनपुंसकयोः क्षत्रः । पतिर्म्मम क्षत्रमशेषभूभृत् प्रभाभिरामो भर-तश्च जिष्णुरिति राघवपाण्डवीये । क्षत्र एव क्षत्रियः स्वार्थे इयः । अपत्यार्थे इय इत्यन्ये । इति भरतः ॥ * ॥
ब्रह्मबाहुजवर्णविशेषः । छत्री इति भाषा । (यथा, मनुः । १ । ३१ ।
“लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः ।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रञ्च निरवर्त्तयत्” ॥)
तत्पर्य्यायः । मूर्द्धाभिषिक्तः २ राजन्यः ३ बाहुजः ४ विराट् ५ । इत्यमरः ।२।८।१॥ क्षत्रः ६ द्विजलिङ्गी ७ राजा ८ नाभिः ९ । इति जटाधरः ॥ नृपः १०